# ॐ श्री परमात्मने नमः। अथ दशमोऽध्यायः। विभूतियोगः।

| | |
|---|---|
| श्रीभगवानुवाच<br>भूय एव महाबाहो श्रृणु मे परमं वचः।<br>यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १॥ | अर्जुन उवाच<br>परं ब्रह्म परं धाम पवित्रं परमं भवान्।<br>पुरुषं शाश्वतं दिव्यम् आदिदेवमजं विभुम्॥ १२॥ |
| न मे विदुः सुरगणाः प्रभवं न महर्षयः।<br>अहमादिर्हि देवानाम् महर्षीणां च सर्वशः॥ २॥ | आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।<br>असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे॥ १३॥ |
| यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।<br>असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥ ३॥ | सर्वमेतदृतं मन्ये यन्मां वदसि केशव।<br>न हि ते भगवन्व्यक्तिम् विदुर्देवा न दानवाः॥ १४॥ |
| बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।<br>सुखं दुःखं भवोऽभावः भयं चाभयमेव च॥ ४॥ | स्वयमेवात्मनात्मानम् वेत्थ त्वं पुरुषोत्तम।<br>भूतभावन भूतेश देवदेव जगत्पते॥ १५॥ |
| अहिंसा समता तुष्टिः तपो दानं यशोऽयशः।<br>भवन्ति भावा भूतानाम् मत्त एव पृथग्विधाः॥ ५॥ | वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः।<br>याभिर्विभूतिभिर्लोकान् इमांस्त्वं व्याप्य तिष्ठसि॥ १६॥ |
| महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।<br>मद्भावा मानसा जाताः येषां लोक इमाः प्रजाः॥ ६॥ | कथं विद्यामहं योगिन् स्त्वां सदा परिचिन्तयन्।<br>केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया॥ १७॥ |
| एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।<br>सोऽविकम्पेन योगेन युज्यते नात्र संशयः॥ ७॥ | विस्तरेणात्मनो योगम् विभूतिं च जनार्दन।<br>भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम्॥ १८॥ |
| अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते।<br>इति मत्वा भजन्ते माम् बुधा भावसमन्विताः॥ ८॥ | श्रीभगवानुवाच<br>हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।<br>प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥ १९॥ |
| मच्चित्ता मद्गतप्राणाः बोधयन्तः परस्परम्।<br>कथयन्तश्च मां नित्यम् तुष्यन्ति च रमन्ति च॥ ९॥ | अहमात्मा गुडाकेश सर्वभूताशयस्थितः।<br>अहमादिश्च मध्यं च भूतानामन्त एव च॥ २०॥ |
| तेषां सततयुक्तानाम् भजतां प्रीतिपूर्वकम्।<br>ददामि बुद्धियोगं तम् येन मामुपयान्ति ते॥ १०॥ | आदित्यानामहं विष्णुः ज्योतिषां रविरंशुमान्।<br>मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥ २१॥ |
| तेषामेवानुकम्पार्थम् अहमज्ञानजं तमः।<br>नाशयाम्यात्मभावस्थः ज्ञानदीपेन भास्वता॥ ११॥ | वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।<br>इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥ २२॥ |

| | |
|---|---|
| रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।<br><br>वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥ २३॥ | अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।<br><br>अहमेवाक्षयः कालः धाताहं विश्वतोमुखः॥ ३३॥ |
| पुरोधसां च मुख्यं माम् विद्धि पार्थ बृहस्पतिम्।<br><br>सेनानीनामहं स्कन्दः सरसामस्मि सागरः॥ २४॥ | मृत्युः सर्वहरश्चाहम् उद्भवश्च भविष्यताम्।<br><br>कीर्तिः श्रीर्वाक्च नारीणाम् स्मृतिर्मेधा धृतिः क्षमा॥ ३४॥ |
| महर्षीणां भृगुरहम् गिरामस्म्येकमक्षरम्।<br><br>यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥ २५॥ | बृहत्साम तथा साम्नाम् गायत्री छन्दसामहम्।<br><br>मासानां मार्गशीर्षोऽहम् ऋतूनां कुसुमाकरः॥ ३५॥ |
| अश्वत्थः सर्ववृक्षाणाम् देवर्षीणां च नारदः।<br><br>गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥ २६॥ | द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।<br><br>जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्॥ ३६॥ |
| उच्चैःश्रवसमश्वानाम् विद्धि माममृतोद्भवम्।<br><br>ऐरावतं गजेन्द्राणाम् नराणां च नराधिपम्॥ २७॥ | वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।<br><br>मुनीनामप्यहं व्यासः कवीनामुशना कविः॥ ३७॥ |
| आयुधानामहं वज्रम् धेनूनामस्मि कामधुक्।<br><br>प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥ २८॥ | दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।<br><br>मौनं चैवास्मि गुह्यानाम् ज्ञानं ज्ञानवतामहम्॥ ३८॥ |
| अनन्तश्चास्मि नागानाम् वरुणो यादसामहम्।<br><br>पितृणामर्यमा चास्मि यमः संयमतामहम्॥ २९॥ | यच्चापि सर्वभूतानाम् बीजं तदहमर्जुन।<br><br>न तदस्ति विना यत्स्यात् मया भूतं चराचरम्॥ ३९॥ |
| प्रह्लादश्चास्मि दैत्यानाम् कालः कलयतामहम्।<br><br>मृगाणां च मृगेन्द्रोऽहम् वैनतेयश्च पक्षिणाम्॥ ३०॥ | नान्तोऽस्ति मम दिव्यानाम् विभूतीनां परन्तप।<br><br>एष तूद्देशतः प्रोक्तः विभूतेर्विस्तरो मया॥ ४०॥ |
| पवनः पवतामस्मि रामः शस्त्रभृतामहम्।<br><br>झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥ ३१॥ | यद्यद्विभूतिमत्सत्त्वम् श्रीमदूर्जितमेव वा।<br><br>तत्तदेवावगच्छ त्वम् मम तेजोंशसंभवम्॥ ४१॥ |
| सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।<br><br>अध्यात्मविद्या विद्यानाम् वादः प्रवदतामहम्॥ ३२॥ | अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।<br><br>विष्टभ्याहमिदं कृत्स्नम् एकांशेन स्थितो जगत्॥ ४२॥ |

ॐ तत्सदिति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

विभूतियोगो नाम दशमोऽध्यायः॥

# om śrī paramātmane namaḥ - atha daśamo'dhyāyaḥ - vibhūtiyogaḥ

| | | |
|---|---|---|
| śrībhagavānuvāca<br>bhūya eva mahābāho<br>śṛṇu me paramaṁ vacaḥ<br>yatte'haṁ prīyamāṇāya<br>vakṣyāmi hitakāmyayā 1 | ahaṁ sarvasya prabhavaḥ<br>mattaḥ sarvaṁ pravartate<br>iti matvā bhajante mām<br>budhā bhāvasamanvitāḥ 8 | svayamevātmanātmānam<br>vettha tvaṁ puruṣottama<br>bhūtabhāvana bhūteśa<br>devadeva jagatpate 15 |
| na me viduḥ suragaṇāḥ<br>prabhavaṁ na maharṣayaḥ<br>ahamādirhi devānām<br>maharṣīṇāṁ ca sarvaśaḥ 2 | maccittā madgataprāṇāḥ<br>bodhayantaḥ parasparam<br>kathayantaśca māṁ nityam<br>tuṣyanti ca ramanti ca 9 | vaktumarhasyaśeṣeṇa<br>divyā hyātmavibhūtayaḥ<br>yābhirvibhūtibhirlokān<br>imāṁstvaṁ vyāpya tiṣṭhasi 16 |
| yo māmajamanādiṁ ca<br>vetti lokamaheśvaram<br>asaṁmūḍhaḥ sa martyeṣu<br>sarvapāpaiḥ pramucyate 3 | teṣāṁ satatayuktānām<br>bhajatāṁ prītipūrvakam<br>dadāmi buddhiyogaṁ tam<br>yena māmupayānti te 10 | kathaṁ vidyāmahaṁ yogin<br>stvāṁ sadā paricintayan<br>keṣu keṣu ca bhāveṣu<br>cintyo'si bhagavanmayā 17 |
| buddhirjñānamasammohaḥ<br>kṣamā satyaṁ damaḥ śamaḥ<br>sukhaṁ duḥkhaṁ bhavo'bhāvaḥ<br>bhayaṁ cābhayameva ca 4 | teṣāmevānukampārtham<br>ahamajñānajaṁ tamaḥ<br>nāśayāmyātmabhāvasthaḥ<br>jñānadīpena bhāsvatā 11 | vistareṇātmano yogam<br>vibhūtiṁ ca janārdana<br>bhūyaḥ kathaya tṛptirhi<br>śṛṇvato nāsti me'mṛtam 18 |
| ahiṁsā samatā tuṣṭiḥ<br>tapo dānaṁ yaśo'yaśaḥ<br>bhavanti bhāvā bhūtānām<br>matta eva pṛthagvidhāḥ 5 | arjuna uvāca<br>paraṁ brahma paraṁ dhāma<br>pavitraṁ paramaṁ bhavān<br>puruṣaṁ śāśvataṁ divyam<br>ādidevamajaṁ vibhum 12 | śrībhagavānuvāca<br>hanta te kathayiṣyāmi<br>divyā hyātmavibhūtayaḥ<br>prādhānyataḥ kuruśreṣṭha<br>nāstyanto vistarasya me 19 |
| maharṣayaḥ sapta pūrve<br>catvāro manavastathā<br>madbhāvā mānasā jātāḥ<br>yeṣāṁ loka imāḥ prajāḥ 6 | āhustvāmṛṣayaḥ sarve<br>devarṣirnāradastathā<br>asito devalo vyāsaḥ<br>svayaṁ caiva bravīṣi me 13 | ahamātmā guḍākeśa<br>sarvabhūtāśayasthitaḥ<br>ahamādiśca madhyaṁ ca<br>bhūtānāmanta eva ca 20 |
| etāṁ vibhūtiṁ yogaṁ ca<br>mama yo vetti tattvataḥ<br>so'vikampena yogena<br>yujyate nātra saṁśayaḥ 7 | sarvametadṛtaṁ manye<br>yanmāṁ vadasi keśava<br>na hi te bhagavanvyaktim<br>vidurdevā na dānavāḥ 14 | ādityānāmahaṁ viṣṇuḥ<br>jyotiṣāṁ raviraṁśumān<br>marīcirmarutāmasmi<br>nakṣatrāṇāmahaṁ śaśī 21 |

| | | |
|---|---|---|
| vedānāṁ sāmavedo'smi<br>devānāmasmi vāsavaḥ<br>indriyāṇāṁ manaścāsmi<br>bhūtānāmasmi cetanā 22 | anantaścāsmi nāgānām<br>varuṇo yādasāmaham<br>pitṝṇāmaryamā cāsmi<br>yamaḥ saṁyamatāmaham 29 | dyūtaṁ chalayatāmasmi<br>tejastejasvināmaham<br>jayo'smi vyavasāyo'smi<br>sattvaṁ sattvavatāmaham 36 |
| rudrāṇāṁ śaṅkaraścāsmi<br>vitteśo yakṣarakṣasām<br>vasūnāṁ pāvakaścāsmi<br>meruḥ śikhariṇāmaham 23 | prahlādaścāsmi daityānām<br>kālaḥ kalayatāmaham<br>mṛgāṇāṁ ca mṛgendro'ham<br>vainateyaśca pakṣiṇām 30 | vṛṣṇīnāṁ vāsudevo'smi<br>pāṇḍavānāṁ dhanañjayaḥ<br>munīnāmapyahaṁ vyāsaḥ<br>kavīnāmuśanā kaviḥ 37 |
| purodhasāṁ ca mukhyaṁ mām<br>viddhi pārtha bṛhaspatim<br>senānīnāmahaṁ skandaḥ<br>sarasāmasmi sāgaraḥ 24 | pavanaḥ pavatāmasmi<br>rāmaḥ śastrabhṛtāmaham<br>jhaṣāṇāṁ makaraścāsmi<br>srotasāmasmi jāhnavī 31 | daṇḍo damayatāmasmi<br>nītirasmi jigīṣatām<br>maunaṁ caivāsmi guhyānām<br>jñānaṁ jñānavatāmaham 38 |
| maharṣīṇāṁ bhṛguraham<br>girāmasmyekamakṣaram<br>yajñānāṁ japayajño'smi<br>sthāvarāṇāṁ himālayaḥ 25 | sargāṇāmādirantaśca<br>madhyaṁ caivāhamarjuna<br>adhyātmavidyā vidyānām<br>vādaḥ pravadatāmaham 32 | yaccāpi sarvabhūtānām<br>bījaṁ tadahamarjuna<br>na tadasti vinā yatsyāt<br>mayā bhūtaṁ carācaram 39 |
| aśvatthaḥ sarvavṛkṣāṇām<br>devarṣīṇāṁ ca nāradaḥ<br>gandharvāṇāṁ citrarathaḥ<br>siddhānāṁ kapilo muniḥ 26 | akṣarāṇāmakāro'smi<br>dvandvaḥ sāmāsikasya ca<br>ahamevākṣayaḥ kālaḥ<br>dhātāhaṁ viśvatomukhaḥ 33 | nānto'sti mama divyānām<br>vibhūtīnāṁ parantapa<br>eṣa tūddeśataḥ proktaḥ<br>vibhūtervistaro mayā 40 |
| uccaiḥśravasamaśvānām<br>viddhi māmamṛtodbhavam<br>airāvataṁ gajendrāṇām<br>narāṇāṁ ca narādhipam 27 | mṛtyuḥ sarvaharaścāham<br>udbhavaśca bhaviṣyatām<br>kīrtiḥ śrīrvākca nārīṇām<br>smṛtirmedhā dhṛtiḥ kṣamā 34 | yadyadvibhūtimatsattvam<br>śrīmadūrjitameva vā<br>tattadevāvagaccha tvam<br>mama tejoṁśasaṁbhavam 41 |
| āyudhānāmahaṁ vajram<br>dhenūnāmasmi kāmadhuk<br>prajanaścāsmi kandarpaḥ<br>sarpāṇāmasmi vāsukiḥ 28 | bṛhatsāma tathā sāmnām<br>gāyatrī chandasāmaham<br>māsānāṁ mārgaśīrṣo'ham<br>ṛtūnāṁ kusumākaraḥ 35 | athavā bahunaitena<br>kiṁ jñātena tavārjuna<br>viṣṭabhyāhamidaṁ kṛtsnam<br>ekāṁśena sthito jagat 42 |

om tatsaditi śrīmad bhagavad gītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde

vibhūtiyogo nāma daśamo'dhyāyaḥ